(1067) " प्रथ प्रख्याने " (I-भ्वादिः-765. अक.सेट्. आत्म.)

घटादिः षिच्च। 'प्रख्यानम्=प्रसिद्धिः।' इति क्षीरस्वामी। 'विस्तारेऽपि' इति धा. का. [2.4]। 'प्रथते प्राथयत्येतत् प्रख्याने द्वितयं प्रथेः।' (श्लो. 99) इति देवः।

प्राथकः-थिका, [1]प्रथकः-थिका, पिप्रथिषकः-षिका, पाप्रथकः-थिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकक्रथतिवत् (206) तद्धातुविषयकप्रातिस्विकरूपाणि विना ज्ञेयानि। [2]प्रथा, [3]पृथुः-पृथु, [4]प्रथमः, [5]पृथिवी इति रूपाण्यस्माद्भवन्तीति विशेषः।

(1068) " प्रथ प्रख्याने " (X-चुरादिः-1553. अक. सेट्. उभ.)[अ]

'—क्षेपे च।' इति द्रुमे (श्लो. 188)।

'प्रथते प्राथयत्येतत् प्रख्याने द्वितयं प्रथेः।' (श्लो. 99) इति देवः।

प्राथकः-थिका, पिप्राथयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकक्ष्मापयतिवत् (282) ज्ञेयानि। 'नान्ये मितोऽहेतौ' (ग. सू. भ्वादौ) इति सम्भवद्धेतुमण्णिचां चुरादिणिचि मित्त्वनिषेधात् घटादिकार्यमत्र नेति ज्ञेयम्। [A]प्राथितः।

---

1. ण्यन्ते सर्वत्र, 'घटादयो मितः' (ग. सू. भ्वादौ) इति मित्संज्ञायाम्, 'मितां ह्रस्वः' (6-4-92) इति उपधाह्रस्वे रूपम्।
2. 'घटादयः षितः' (ग. सू. भ्वादौ) इति षित्त्वात्, स्त्रियाम्, 'षिद्भिदादिभ्यः—' (3-3-104) इत्यङि रूपमेवम्।
3. 'प्रथिम्रदि—' (द. उ. 1. 113) इति कुप्रत्यये सम्प्रसारणे च रूपमेवम्। प्रथतेऽसौ इति पृथुः=राजा, प्रथनं वा। पृथु=विस्तीर्णम्।
4. 'प्रथेरट् च' (द. उ. 7.29) इति मन्प्रत्ययेऽडागमे च रूपम्।
5. 'प्रथेः षिवन् सम्प्रसारणं च' (द. उ 8.124) इति षिवन्प्रत्यये सम्प्रसारणे च रूपम्। षित्त्वात् ङीष्।

[अ] क्षीरस्वामी धातुममुं चुरादिषु न पठति। 'पृथ (पर्थ)' इति तत्र पाठः।

A. 'अप्राथितो व्रजगृहेऽपि च पर्थितोऽभूत्......॥' धा. का. 3.15.